# Shri Shailakshetre Lakshmivarapradana Varnanam

# श्रीशैलक्षेत्रे लक्ष्मीवरप्रदानवर्णनम्

## Document Information

Text title : Shri Shailakshetre Lakshmivarapradana Varnanam

File name : shailakShetrelakShmIvarapradAnavarNanam.itx

Category : shiva, shivarahasya, lakShmI, devii

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 27||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# श्रीशैलक्षेत्रे लक्ष्मीवरप्रदानवर्णनम्

(शिवगौरीसंवादे)
ईश्वरः -
श्रीशैलेशोऽहमीशानि तत्तुङ्गशिखरे स्थितः ।
ब्रह्मविष्ण्वादिभिर्देवैर्गणेन्द्रैरपि सेवितः ॥ ५०॥

तत्र मां नियमाद्दृष्ट्वा सर्वपापैः प्रमुच्यते ।
पुरा श्रिया तपस्तप्तं तत् श्रृणुष्वाम्बिके मुदा ॥ ५१॥

यदाऽनङ्गो मया दग्धः श्रियः पुत्रो महेश्वरि ।
तेन दुःखेन सन्तप्ता भस्मरुद्राक्षभूषणा ॥ ५२॥

पञ्चाग्निनिरता देवी पञ्चाक्षरपरायणा ।
लक्ष्मीः सन्तपदत्युग्रं वर्षाणां शतकं शिवे ॥ ५३॥ (तताप तप अत्युग्रं)

दत्तं च दर्शनं देवि तस्याः कालान्तरे मया ।
मां दृष्ट्वा नियता गौरि तुष्टाव नियता तदा ॥ ५४॥

लक्ष्मीः -
शर्वरीरमणखण्डमौलिनं शर्वरीकृतविहारहारिणम् ।
शर्वसर्वपतिमाश्रये सदा दूर्वया तु सततं समर्च्यसे ॥ ५५॥

कुम्भिकुम्भदलनोज्ज्वलत्पदं कुम्भिवक्त्रवृतमान्यपुत्रकम् ।
कुम्भसम्भवमुनीन्द्रपूजितं कुम्भिभिन्नटनमीशमाश्रये ॥ ५६॥

(शिवगौरीसंवादे ईश्वरः -
इत्थं स्तुत्वा हि मां लक्ष्मीस्त्वामस्तौषीत् तदाम्बिके ।)
अमरीकबरीभारचञ्चरीकैः मुखरितवेदशिरोभिरीड्यपादाम् ।
सुखकरकिन्नरमौलिपुष्पजालैः भ्रमराम्बां प्रणतास्मि शङ्करीं ताम् ॥ ५७॥

इत्थं स्तुत्वा तदा मां त्वां ययाचे वरमुत्तमम् ॥ ५८॥

अनङ्गः कोपतस्तेऽद्य त्वया दग्धो महेश्वर ।
साङ्गतां प्राप्नुयाच्छम्भो एष देयो वरो मम ॥ ५९॥

ईश्वरः -
तदा लक्ष्म्या वचः श्रुत्वा तामवोचं तदाम्बिके ।
त्वत्कटाक्षेण देवेशि पुनरुज्जीव्यतां स्मरः ।
पुत्रीणीयं भवेल्लक्ष्मीः सदा मुदितमानसा ॥ ६०॥

इत्थं मद्वचनात्त्वं हि त्वत्कटाक्षोत्थकोणतः ।
अनङ्ग साङ्गतां नीतो विबभौ स यथापुरम् ॥ ६१॥

ऐक्षवं कार्मुकं बिभ्रत् पुष्पबाणांस्तथांऽबिके ।
रत्या सह तदा गौरि मां तुष्टाव प्रहृष्टधीः ॥ ६२॥

मन्मथः -
दुग्धाब्धिप्रभवप्रचण्डौरगक्ष्वेडव्यथासंहृतौ
त्वामेकं ददृशुर्निलिम्पमुखराः सोत्कम्पगात्राः शिवम् ।
तत्पानारुणलोलनेत्रयुगलं वीक्ष्याकृतार्थस्मितं
शम्भो शङ्कर शाश्वतेति बहुधा त्वां तुष्टुवुः सुस्तवैः ॥ ६३॥

ईश्वरः -
इत्थं स्मरेण देवेशि श्रीशैलेशः स्तुतोऽस्म्यवहम् ।
लक्ष्मीः पुत्रं तदा वीक्ष्य साङ्गमुद्यतकार्मुकम् ॥ ६४॥

प्रहृष्टा साऽभवद्गौरि वृतश्चापि तया वरः ॥ ६५॥

लक्ष्मीः -
मन्नामा पर्वतश्चायं भवत्वद्य महेश्वर ।
तस्यै दत्तो वरो देवि तन्नामख्यापनाय मे ॥ ६६॥

॥ इति शिवरहस्यान्तर्गते श्रीशैलक्षेत्रे लक्ष्मीवरप्रदानवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः २७॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 27..

Notes:

Shri Shailam Kshetra came to be known so when Shri (Devi Lakshmi) was graced by Shiva at this place with resurrection of Her son Manmatha

(Kamadeva), who had previously been burned to ashes by Shiva. Shri Shailam H Shri - Lakshmi, Shailam - Mountain.
Shri Shailam Kshetra is abode to Shaileshwara Linga (Mallikarjuna Jyotirlinga) having Vibhuti Kunda and the origin of River Krishna near it. Mallikarjuna (Shiva / Shailesha / Shaileshwara) resides here with Bhramaramba (Devi).
Shri Shailam Kshetra is also an abode to Tripurantaka Linga, Ghantakarneshwara Linga (with Sudha Kunda), and Hatakeshwara Linga (with Hataka Kunda).

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Shri Shailakshetre Lakshmivarapradana Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*